International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 135-137
© 2021 IJSR
www.anantaajournal.com
Received: 24-10-2020
Accepted: 07-12-2020

**Dr. Diddigi Vamsi Krishna**
Research Assistant, Oriental Research Institute, University of Mysore, Mysuru, Karnataka, India

**Corresponding Author:**
**Dr. Diddigi Vamsi Krishna**
Research Assistant, Oriental Research Institute, University of Mysore, Mysuru, Karnataka, India

# पुराणेषु प्रतिसर्गचिन्तनम्

**Dr. Diddigi Vamsi Krishna**

**सारांशः -**
पुराणानाम् अध्ययनाय पुराणोक्तानामेव तेषां लक्षणानाम् अध्ययनस्य आवश्यकता वर्तते। परन्तु पुराणलक्षणानामपि मतभेदाः वर्तन्ते। लोकरूढ्यां पुराणस्य पञ्चैव लक्षणानीति वर्तते। भागवते तु दशलक्षणानि कथितानि। लोके तु पञ्चैवेति दृष्ट्या भागवतोक्तदशलक्षणानि उक्तपञ्चलक्षणेषु अन्तर्भवन्तीति कृत्वा सर्गः, प्रतिसर्गः, वंशः, मन्वन्तरम्, वंशानुचरितं चेति पञ्चलक्षणानीति दर्शितानि। सृष्टिविषयमधिकृत्य बहूनि पाण्डित्यपूर्णानि लेखनानि पुस्तकानि च उद्धृतानि। परं प्रतिसर्गमधिकृत्य अल्पसङ्ख्याकानि सम्बद्धप्रतिपादकानि दृश्यन्ते। अस्मादेव कारणात् एतेन लेखनमूलेन प्रतिसर्गमधिकृत्य किञ्चिदवगाहनाय बोधनं यतितम्॥

**विशेषपदानि** - प्रतिसर्गः, लयः, प्रलयः, अन्तरप्रलयः, प्रतिसञ्चरः, प्रतिसङ्क्रमः, प्रत्याहारः, प्रसञ्जमः, उपसंहृतिः, अन्तराला, सम्प्लवः, आभूतसम्प्लवः, उदाप्लुतः, निरोधः, संस्था, एकार्णवावस्था, प्रतिसंयमः, सृष्टिः, ब्रह्मा, ब्रह्म॥

## भूमिका -

> सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
> वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्॥[i]

पुराणानाम् अध्ययनाय पुराणोक्तानां तेषां लक्षणानाम् अध्ययनस्य आवश्यकता वर्तते। परन्तु पुराणलक्षणानामपि मतभेदाः वर्तन्ते। लोकरूढ्या पुराणस्य पञ्चैव लक्षणानीति वर्तते। भागवते तु दशलक्षणानि कथितानि। लोके तु पञ्चैवेति दृष्ट्या भागवतोक्तदशलक्षणानि उक्तपञ्चलक्षणेषु अन्तर्भवन्तीति कृत्वा सर्गः, प्रतिसर्गः, वंशः, मन्वन्तरम्, वंशानुचरितं चेति पञ्चलक्षणानीति दर्शितानि। वस्तुतः प्रतिसर्गस्य विषयचर्चाकारणेनात्र अयमेव विषयः प्रतिपादितुमद्यतः।

प्रायशः सर्वेष्वपि पुराणेषु प्रतिसर्गस्य विश्लेषणं कृतं दृश्यत एव। पुराणेषु प्रतिसर्गार्थबोधका अनेकाः पर्यायशब्दाः दृश्यन्ते। ते च- लयः, प्रलयः, अन्तरप्रलयः, प्रतिसञ्चरः, प्रतिसङ्क्रमः, प्रत्याहारः, प्रसञ्जमः, उपसंहृतिः, अन्तराला, सम्प्लवः, आभूतसम्प्लवः, उदाप्लुतः, निरोधः, संस्था, एकार्णवावस्था, प्रतिसंयमश्चेति।

पुराणलक्षणेष्वन्यतमः प्रतिसर्गः(प्रलयः) उक्तप्रकारेण उक्तेषु पुराणेषु वर्णितः दृश्यते। यथा- ब्रह्मपुराणे (२३१-२३३ अध्यायाः), विष्णुपुराणे (६.३-४ अध्यायाः), वायुपुराणे (१००.११८-२४३ श्लोकाः), भागवते (१२.४.४-३९ श्लोकाः), मार्कण्डेये (५६.३-४६ श्लोकाः), कौर्मे उत्तरार्धे (४५.५-६१ श्लोकाः), गारुडे (२१५.१,६ अध्यायाः), ब्रह्माण्डपुराणस्य उपसंहारस्य सङ्गतौ च (तृतीयाध्यायः) एवं प्रतिसर्गलक्षणस्य विषयबोधनं द्रष्टुं शक्यते।

यथा वर्षर्तौ पृथिव्यां अज्ञातानि बीजानि लतादूर्वादिरूपैः स्वयं उद्भवन्ति तथैव वर्तमानसृष्टेः पूर्वसृष्टौ उत्पन्नाः जीवाः तेषां शेषसंस्कारैः पुनः सर्जनसमये अनेके पदार्थाः तं शेषसंस्कारं अनुभवितुं पुनर्जीवरूपेण उद्भवन्ति।

यः जीवः उत्पद्यते स तु नाश्य एव। तच्चक्रे भ्रमत्येव च। भगवतः नियमानुसारं सृष्टेरनन्तरं प्रलयावस्थामपि अनुभवितव्यमेव। एवमेव वर्तमानसृष्टेः प्रलयस्य कालविषयोऽपि पुराणेषु विशेषेण आधुनिकविज्ञानातीतं समाधत्तः दृश्यते।

**प्रलयभेदाः -**

पुराणेषूक्तरीत्या प्रलयः चतुर्विधः। ते च-

१. नैमित्तिकप्रलयः
२. प्राकृतिकप्रलयः
३. नित्यप्रलयः
४. आत्यन्तिकप्रलयः

नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज।
नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः॥[ii]
नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः।
आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी॥[iii]

**१. नैमित्तिकप्रलयः -**

ब्रह्मणः दिनस्यान्ते जायमानः यः प्रलयो वा प्रतिसर्गः नैमित्तिक इत्युच्यते।

सकल्पो यत्र मनवश्चतुर्दश विशाम्पते।
तदन्ते प्रलयस्तावत् ब्राह्मी रात्रिरुदाहृता॥[iv]

निद्रासक्तो ब्रह्मा समस्तं विश्वं तस्योदर एव संहृत्य स्वकारणस्वरूपे शेषशायिनि नारायणे लीयत इति कानिचन पुराणानि पाठयन्ति। ब्रह्मण इमं शयनं निमित्तीकृत्य जायमानप्रलयो वा प्रतिसर्गः व्यासभगवता नैमित्तिक इत्युपदिष्टः।

एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्।
शेतेऽनन्तासने विश्वमात्मसात्कृत्य चात्मभूः॥[v]
एष नैमित्तिको नाम मैत्रेय प्रतिसञ्चरः।
निमित्तं तत्र यच्छेते ब्रह्मरूपधरो हरिः॥[vi]

नैमित्तिकस्तु प्रलयः पुनर्द्विविधो विभक्तः। प्रथम आंशिकोऽपरः पूर्णप्रलय इति। एकस्य मन्वन्तरस्य समाप्तौ भगवदिच्छानुसारेण वा तस्यैव मन्वन्तरस्य मध्ये जायमानः यः प्रलयः वर्तते स एव आंशिकप्रलयः। परन्तु ब्रह्मणः दिनस्य अन्त्ये पूर्णप्रलये सञ्जाते सम्पूर्णा पृथिवी जलमग्ना भूत्वा भूः, भुवः, स्व इत्यूर्ध्वव्याहृतित्रयम् विच्छिद्यते। एतस्मात् व्याहृतित्रयादप्यूर्ध्वाः महर्जनस्तपस्सत्यलोकाः स्वस्थान एव निर्व्याकुलस्थाना भवन्ति। महर्लोकवासिनो महर्षयः सिद्धाश्च तस्मिन्नेव लोके तपमाचरय्य तदूर्ध्वस्थान् जनादिलोकान् गत्वा ध्यानपरायणा भवन्ति। ब्रह्मणः जागृदवस्थायां तस्य प्राणशक्तिप्रेरणया ब्रह्माण्डचक्रम् निरन्तरं भ्रमत्येव। परन्तु ब्रह्मणः निद्रावस्थायां यथा सुषुप्त्यवस्थास्थाः इन्द्रियाः निश्चेष्टा भवन्ति तथैव ब्रह्माण्डे सकलक्रियाः निरुद्धा भवन्ति। तत्समये भूर्भुवस्स्वरिति व्याहृतित्रयम् जलमग्नं भवतिति पुराणानि स्पष्टं बोधयन्ति।

**२. प्राकृतिकप्रलयः -**

ब्रह्मणः आयुषः उत्तरार्धस्य समाप्तौ सप्तप्रकृतयः (महत्-अहङ्कार-पञ्चतन्मात्राणि च) स्वयमज्ञात्वैव प्रकृतौ लीयन्ते। तस्मात्कारणादयं प्राकृतिकः प्रलयः।

द्विपरार्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः।
तदा प्राकृतयः सप्त कल्पन्ते प्रलयाय वै॥
एष प्राकृतिको राजन्! प्रलयो यत्र लीयते।
अण्डकोशस्तु सङ्घातो विघात उपसादिते॥[vii]
महदाद्यं विशेषान्तं यदा संयाति संक्षयम्।
प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः॥
प्रयाति प्राकृते चैव ब्रह्माण्डे प्रकृतौ लयम्॥[viii]

प्राकृतिकप्रलयकाले विश्वस्मिन् अतिभीकरं संहारदृश्यं उत्पद्यते। प्रलयस्य प्रथमावधौ वर्षशतं लोके वृष्ट्यभावेन अन्नस्य अनुपलब्ध्या च बुभुक्षाक्षोभया जनाः परस्परं खादन्तः सन् जनानां जीवनलीलायाः समाप्तिर्जायते। द्वितीयावधौ वर्षशतं सूर्यस्य प्रचण्डकिरणानां तापेन ज्वालया च स्थावरजङ्गमात्मकमिदं सर्वं जगत् भस्मीभविष्यति। तदनन्तरायाम् तृतीयावधौ वर्षशतं प्रचण्डपवनैः आकाशः मृन्मयो भविष्यति। तद्द्वारा विविधवर्णैरुल्बणो मेघः गर्जनैः सह मुसलगात्रं वर्षधाराम् वर्षयिष्यति। एवम् उत्पत्तिकाले अनुलोमक्रमेण यत् तत्त्वं येन तत्त्वेन सञ्जातः भवति तदेव विलोमक्रमेण प्रलयकाले विलीयते। यथा- पृथिवी जले, जलं तेजसि, तेजः वायौ, वायुराकाशे, आकाशोऽहङ्कारे, अहङ्कारो महति विलीय तत्पदार्थः प्रकृतौ प्रलीयते। प्रकृतिः तत्प्रेरकः पुरुषश्च गुणातीते परमात्मनि विलीयेते।

प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी।
पुरुषश्चाप्युभावेतौ लीयते परमात्मनि॥[ix]

आद्यन्तरहितः परमात्मा सर्वस्यापि कारणो भवति। तस्मात् तस्य लयैव न विद्यते। परन्तु प्रकृतिपुरुषयोः सत्त्वादिशक्तयः कालप्रभावेण क्षीणास्सन् स्वकारणे परमात्मनि लीना भविष्यन्ति। एवमेव प्राकृतिकप्रलयकाले केवलं परमात्मतत्त्वं शेषरूपेण भविष्यति।

लयः प्राकृतिको ह्येष पुरुषव्यक्तयोर्यदा।
शक्तयः सम्प्रलीयन्ते विवशाः कालविद्रुताः॥[x]

**३. आत्यन्तिकप्रलयः -**

नैमित्तिकस्तु प्रलयः कल्पस्यान्ते (ब्रह्मणः दिनस्यान्ते) सञ्जायते। एवमेव प्राकृतिकप्रलयः ब्रह्मणः आयुषः उत्तरार्धस्य अन्त्ये सञ्जायते। परन्तु आत्यन्तिकप्रलयस्य कालो न निश्चितः। अयं तु प्रलयः उपर्युक्तप्रलयद्वयस्य कालेऽपि सम्भवितुं शक्यत एव। एवमेव अस्य कालनिश्चयाभावात् अस्य साधनसामग्री यदा अनुकूले भविष्यतः तदा तत्काल एवायमात्यन्तिकः प्रलयः सम्भवति। वस्तुतः आत्यन्तिकप्रलयस्यार्थं कानिचन पुराणानि आत्यन्तिकदुःखनिवृत्तिरित्यपि पाठयन्ति। अस्यायं लौकिकनामान्तरमपि वर्तत एव। वेदे लोके च कर्मभिः दुःखनिवृत्तिः त्रिधा सञ्जायते। आत्यन्तिकप्रलयो नाम सर्वस्मिंस्थस्य अज्ञानस्य नाशः। स एव मोक्ष इति कथ्यन्ते बुधाः। उक्तदुःखत्रैविध्यमेवं द्रष्टुं शक्यते- आध्यात्मिकम्,

आधिदैविकम्, आधिभौतिकञ्चेति। इदमात्तविवेकी विरागस्सन् गुरूणां उपदेशेन ज्ञानं सम्पाद्य आत्यन्तिकदुःखनिवृत्तिरूपं मोक्षं लप्स्यते[xi]। आत्यन्तिकप्रलयसमये ज्ञानी तस्याहङ्कृतिं ज्ञानरूपखड्गेन छिद्य भगवत्तत्त्वं (मोक्षं) प्राप्नोति।

**४. नित्यप्रलयः -**

पुराणेषूक्तसृष्टिप्रलयचक्रमनुसृत्य तौ सृष्टिप्रलयौ नित्यं सञ्जायेते। उदाहरणाय यथा द्वितीयक्षणस्य उत्पत्तेः प्राक् प्रथमक्षणस्य नाशः जायते तथैव नित्यप्रलयः सम्भवत्येवेति दार्शनिकानां सुमतम्। एवमेव सांसारिकाः सर्वपदार्थाश्च नदीप्रवाहवत् दीपशिखावच्च प्रतिक्षणं परिवृतः सन्त्येव। तथा हि ब्रह्माणमारभ्य स्तम्भपर्यन्तं सर्वे पदार्थाः प्राणिनश्च सर्वकालसर्वावस्थासु उद्भूय परिवृता भूत्वा नाशा भवन्ति इति।

नित्यदा सर्वभूतानां ब्रह्मादीनां परन्तप।
उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः सम्प्रचक्षते॥[xii]

कालशक्तिरनन्ता। सा प्रतिक्षणं परिणम्य भ्रमत्येव। परन्तु सा शक्तिः मानवबुद्धयेऽज्ञातसूक्ष्मः। तस्मात्सा सर्वैर्नानुभूतव्या।

योऽयं सन्दृश्यते नित्यं लोके भूतक्षयस्त्विह।
नित्यः सङ्कीर्त्यते नाम मुनिभिः प्रतिसञ्चरः॥[xiii]

प्रतिदिनं ब्रह्मणः निद्रासमये सर्वसृष्टिः अज्ञाने विलीय न कोऽपि विशेषभावं प्राप्नोतीति विष्णुपुराणं बोधयति। एनामेव प्रक्रियां नित्यप्रलय इति वेदव्यासो भगवान् उपदिष्टवान्। एवमेव विष्णुपुराणेऽपि चतुर्विधप्रलयमधिकृत्य उल्लेखः द्रष्टुं शक्यते।

ब्राह्मो नैमित्तिकस्तत्र शेतेऽयं जगतीपतिः।
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम्॥
ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि।
नित्यस्सदैव भूतानां यो विनाशो दिवानिशम्॥[xiv]

**उपसंहारः -**

प्रायः सर्वेष्वपि पुराणेषु प्रलयस्य वर्णनं वर्तत एव। स्थूलावलोकनेन तत्र कश्चित् व्यत्यासो दृश्यते। तथा च प्राचीन नैयायिकैरपि प्रलयः द्विविध इत्यङ्गीकृतः। तौ- खण्डप्रलयः महाप्रलयश्चेति। परं नवीनाः नैयायिकाः केवलखण्डप्रलयमेव अङ्गीकुर्वन्ति। नवीनानां मते तु भूमण्डले जनरहितं स्थानं न वर्तते। एवञ्च साङ्ख्यवादिनस्तु प्रकृते द्विविधं प्रलयमङ्गीकुर्वन्ति। तौ- स्वरूपप्रलयः विरूपप्रलयश्च। एतेषां मते तु प्रलयस्य कालः न निर्दिष्टः। परं प्रलयस्तु वर्तत एव। साङ्ख्याः भौतिकरूपेणैव सृष्टिप्रलयावङ्गीकुर्वन्ति। परन्तु नास्त्येतन्मते आध्यात्मिकः प्रलयः। दार्शनिकाः वैज्ञानिकाश्च प्रकृतौ परिणाममात्रेणैव प्रलयमङ्गीकुर्वन्ति। परन्तु पौराणिकाः तेषां योगदृष्टेर्बलेन प्रलयकालं निर्णीयन्ते। एवं रीत्या ब्रह्माण्डस्य आयूरूपगम्भीरविषयः केवलपुराणेष्वेव लभ्यते न कुत्रापि बोधितश्च।

एवं प्रकारेण विविधरूपप्रलयचिन्तनेन विश्वस्य भावाभावाश्रयस्य परमात्मनः ज्ञानस्य उपलब्धिर्जायते। वस्तुतः नित्यनिरञ्जनरूपस्य परमात्मनः न दिनम्, न रात्रिः, न च वर्षस्यापि परिमाणं वर्तते। तस्यायुरपि न क्षीयते। पण्डिताः औपचारिकरूपेण मनोविनोदाय दिनरात्रिवर्षायुरादिपरिमाणं कल्पयन्ति।

द्विपरार्धात्मिकः कालः कथितो यो मया तव।
तदहस्तस्य मैत्रेय विष्णोरीशस्य कथ्यते॥
नैवाहस्तस्य न निशा नित्यस्य परमात्मनः।
उपचारस्तथाप्येषः तस्येशस्य द्विजोच्यते॥[xv]

॥ इति शम् ॥

**अधीतग्रन्थसूची**


१. ब्रह्मवैवर्तपुराणम् (भागः-१ & २), विनायक गणेश आपटे, आनन्दाश्रममुद्रणालयः, पुणे, १९३५.
२. ब्रह्मपुराणम् (भाग: १ & २), पं.श्रीरामशर्मा, संस्कृत संस्थानम्, बरला, १९७१.
३. विष्णुपुराणम् (कन्नड) (भागः-१ & २), वि॥एन्.रङ्गनाथशर्मा, स्वामि हर्षानन्द, बेङ्गलूरु, २०११.
४. विष्णुपुराणम् (भागः-१ & २), डा.श्रद्धा शुक्ला, नाग प्रकाशक, दिल्ली, १९९८.
५. वायुपुराणम्, पं.श्रीरामशर्मा, संस्कृत संस्थानम्, बरला, १९६७.
६. श्रीमद्भागवतम्, पि.एस्.शेषगिरि आचार्यः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु, २०१२.
७. मार्कण्डेयपुराणम्, पं.जीवानन्द विद्यासागर भट्टाचार्यः, कोलकत्ता, १८७६.
८. कूर्मपुराणम्, पं.आनन्दस्वरूपगुप्तः, सर्वभारतीयकशिराजन्यासः, वाराणसी, १८९३.
९. गरुडपुराणम्, नागप्रकाशक, दिल्ली, २०१२.
१०. ब्रह्माण्डपुराणम्, डा.के.वी.शर्मा, कृष्णदास अकादमी, वाराणसी, २०००.


---

[i] ब्रह्मवैवर्तपुराणम् १३१.५
[ii] विष्णुपुराणम् ६.३.२
[iii] भागवतम् १२.४.२
[iv] भागवतम् १२.४.३
[v] भागवतम् १२.४.४
[vi] भागवतम् ६.४.७
[vii] भागवतम् १२.४.४६-४७
[viii] कूर्मपुराणे उत्तरार्धम् ४५.८
[ix] विष्णुपुराणम् ६.४.२९
[x] भागवतम् १२.४.२२
[xi] विष्णुपुराणम् (श्रीधरीयटीकायां) ६.५.१
[xii] भागवतम् १२.४.३५
[xiii] कूर्मपुराणे उत्तरार्धम् ४५.६
[xiv] विष्णुपुराणम् १.७.४२-४३
[xv] विष्णुपुराणम् ६.४.४७,४९